ति सत्यऽधर्मा । वि । आनट् । यः । च । अपः । चंद्राः । प्रथमः । जजान । कस्मै । देवाय ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२९

हविषा। विधेम॥१०३॥ अभि। आ। वर्त्तस्व। पृथिवि। यज्ञेन। पयसा। सह॥ वपां। ते। अ
ग्निः। इषितः। अरोहत्॥१०४॥ अग्ने। यत्। ते। शुक्रं। चंद्रं। पूतं। च। यज्ञियं। तत्। दे
वेभ्यः। भरामसि॥१०५॥ इषं। ऊर्ज्जं। अहं। इतः। आ। ददे। ऋतस्य। योनिं। महिषस्य।
धारां। आ। मा। गोषु। विशतु। आ। तनुषु। जहामि। सेदिं। अनिरां। अमीवां॥
१०६॥ अग्ने। तव। श्रवः। वयः। महि। भ्राजंते। अर्चयः। विभावसो इति विभाऽव
सो। बृहद्भानो इति बृहत्ऽभानो। शवसा। वाजं। उक्थ्यं। दधासि। दाशुषे। कवे॥१०७॥
पावकवर्चा इति पावकऽवर्चाः। शुक्रवर्चा इति शुक्रऽवर्चाः। अनूनवर्चा इति अनून
ऽवर्चाः। उत्। इयर्षि। भानुना। पुत्रः। मातरा। विचरन्निति विऽचरन्। उप। अव
सि। पृणक्षि। रोदसी इति रोदसी। उभे इत्युभे॥१०८॥ ऊर्ज्जः। नपात्। जातवेद इति

जातऽवेदः। सुशस्तिभिरिति सुशस्तिऽभिः। मंदस्व। धीतिभिरिति धीतिऽभिः। हितः।
त्वे इति त्वे। इषः। सं। दधुः। भूरिवर्पस इति भूरिऽवर्पसः। चित्रोतय इति चित्रऽऊ
तयः। वामजाता इति वामऽजाताः॥१०९॥ इरज्यन्। अग्ने। प्रथयस्व। जंतुभिरि
ति जंतुऽभिः। अस्मे इत्यस्मे। रायः। अमर्त्य। सः। दर्शतस्य। वपुषः। वि। राजसि।
पृणक्षि। सानसिं। क्रतुं॥११०॥ इष्कर्त्तारं। अध्वरस्य। प्रचेतसमिति प्रऽचेत
सं। क्षयंतं। राधसः। महः। रातिं। वामस्य। सुभगामिति सुऽभगां। महीं। इषं।
दधासि। सानसिं। रयिं॥१११॥ ऋतावानं। ऋतवानमिति ऋतऽवानं। महि
षं। विश्वदर्शतमिति विश्वऽदर्शतं। अग्निं। सुम्नाय। दधिरे। पुरः। जनाः। श्रु
त्कर्णमिति श्रुत्ऽकर्णं। सप्रथस्तममिति सप्रथःऽतमं। त्वा। गिरा। दैव्यं। मा

२९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३०
२६

नुषा। घुणा।१००॥ आ। प्यायस्व। सं। एतु। ते। वृष्ण्यं। भव। वाजस्य। संगथ इति सं

गथे।१०१॥ सं। ते। पयांऽसि। सं। ऊं इत्यू। यंतु। वाजाः। सं। वृष्ण्यानि। अभिमाति

षाहः। अभिमातिसह इत्यभिमातिऽसहः। आप्यायमान इत्याऽप्यायमानः। अ

मृताय। सोम। दिवि। श्रवांऽसि। उत्तमानीत्युत्ऽतमानि। धिष्व।१०२॥ आप्या

यस्व। मदिंतम। मदिंतमेति मदिन्ऽतम। सोम। विश्वेभिः। अंशुभिरित्यंशुऽभिः।

भव। नः। सप्रथस्तम इति सप्रथःऽतमः। सखा। वृधे।१०३॥ आ। ते। वत्सः। म

नः। यमत्। परमात्। चित्। सधस्थादिति सधऽस्थात्। अग्ने। त्वां। कामयेति

त्वांऽकामया। गिरा।१०४॥ तुभ्यं। ताः। अंगिरस्तमेत्यंगिरःऽतम। विश्वाः।

सुक्षितय इति सुऽक्षितयः। पृथक्। अग्ने। कामाय। येमिरे।१०५॥ अग्निः। प्रि

२६
३०

येषु। धाम। स्विति धामऽसु। कामः। भूतस्य। भव्यस्य। संम्राळिति संऽराट्। एकः। वि

राजति।१०६॥७॥७॥ इति पदपाठे त्रयोदशोऽध्यायः॥७॥ हरिः ॐ। मयि। गृ

ह्णामि। अग्रे। अग्निं। रायः। पोषाय। सुप्रजास्त्वायेति सुप्रजाःऽत्वाय। सुवीर्याये

ति सुऽवीर्याय। मां। ऊं इत्यू। देवताः। सचंतां।१॥ ब्रह्म। जज्ञानं। प्रथमं। पुरस्तात्।

वि। सीमतः। सुरुच इति सुऽरुचः। वेनः। आवरित्याऽवः। सः। बुध्न्याः। उपमा इत्युपऽ

माः। अस्य। विष्ठाः। विस्था इति विऽस्थाः। सतः। च। योनिं। असतः। च। विवरि

ति विऽवः।२॥ हिरण्यगर्भ इति हिरण्यऽगर्भः। सं। अवर्त्तत। अग्रे। भूतस्य। जातः।

पतिः। एकः। आसीत्। सः। दाधार। पृथिवीं। द्यां। उत। इमां। कस्मै। देवाय। हविषा।

विधेम।३॥ द्रप्सः। चस्कंद। पृथिवीं। अनु। द्यां। इमं। च। योनिं। अनु। यः। च। पूर्वः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समानं। योनिं। अनु। संचरंतं। इति। संऽचरंतं। द्रप्सं। जुहोमि। अनु। सप्त। होत्राः॥४॥
नमः। अस्तु। सर्पेभ्यः। ये। के। च। पृथिवीं। अनु। ये। अंतरिक्षे। ये। दिवि। तेभ्यः। स
र्पेभ्यः। नमः॥५॥ याः। इषवः। यातुधानानां। इति। यातुऽधानानां। ये। वा। वनस्प
तीन्। अनु। ये। वा। अवटेषु। शेरते। तेभ्यः। सर्पेभ्यः। नमः॥६॥ ये। वा। अमी इति। अमी॥
रोचने। दिवः। ये। वा। सूर्यस्य। रश्मिषु। येषां। अप्सु। सदः। कृतं। तेभ्यः।
सर्पेभ्यः। नमः॥७॥ कृणुष्व। पाजः। प्रसितिं। इति। प्रऽसितिं। न। पृथ्वीं। याहि। राजे
व। इति। राजाऽइव। अमऽवान्। इभेन। तृष्वीं। अनु। प्रसितिं। इति। प्रऽसि
तिं। द्रूणानः। अस्ता। असि। विध्य। रक्षसः। तपिष्ठैः॥८॥ तव। भ्रमासः। आशु
या। इति। आशुऽया। पतंति। अनु। स्पृश। धृषता। शोशुचानः। तपूंषि। अग्ने। जिह्वया। प

तंगान्। असंदितः। इति। असंऽदितः। वि। सृज। विष्वक्। उल्काः॥९॥ प्रति। स्पशः। वि
सृज। तूर्णितमः इति तूर्णिऽतमः। भव। पायुः। विशः। अस्याः। अदब्धः। यः। नः।
दूरे। अघशंसः। इति अघऽशंसः। यः। अंति। अग्ने। माकिः। ते। व्यथिः। आ। दध
र्षीत्॥१०॥ उत्। अग्ने। तिष्ठ। प्रति। आ। तनुष्व। नि। अमित्रान्। ओषतात्। तिग्म
हेते इति तिग्मऽहेते। यः। नः। अरातिं। समिधान इति संऽइधान। चक्रे। नीचा।
तं। धक्षि। अतसं। न। शुष्कं॥११॥ ऊर्ध्वः। भव। प्रति। विध्य। अधि। अस्मत्। आ
विः। कृणुष्व। दैव्यानि। अग्ने। अव। स्थिरा। तनुहि। यातुजूनां इति यातुऽजू
नां। जामिं। अजामिं। प्र। मृणीहि। शत्रून्॥१२॥ अग्नेः। त्वा। तेजसा। सादया
मि। इंद्रस्य। त्वा। ओजसा। सादयामि॥१३॥ भुवः। यज्ञस्य। रजसः। च। नेता। यत्र।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३०

नियुद्भिरिति नियुत्ऽभिः। सचसे। शिवाभिः। दिवि। मूर्द्धानं। दधिषे। स्वर्षां। स्वः
सामिति स्वःऽसां। जिह्वां। अग्ने। चकृषे। हव्यवाहमिति हव्यऽवाहं॥२४॥ ध्रुवा।
असि। धरुणा। आस्तृतेत्याऽस्तृता। विश्वकर्मणेति विश्वऽकर्मणा। मा। त्वा।
समुद्रः। उत्। वधीत्। मा। सुपर्ण इति सुऽपर्णः। अव्यथमाना। पृथिवीं। दृंह।
॥२५॥ प्रजापतिरिति प्रजाऽपतिः। त्वा। सादयतु। अपां। पृष्ठे। समुद्रस्य। एमन्।
व्यचस्वतीं। प्रथस्वतीं। प्रथस्व। पृथिवी। असि॥२६॥ भूः। भूमिः। असि। अदितिः।
विश्वधाया इति विश्वऽधायाः। विश्वस्य। भुवनस्य। धर्त्री। पृथिवीं। यच्छ। पृथि
वीं। दृंह। पृथिवीं। मा। हिंसीः॥२७॥ विश्वस्मै। प्राणाय। अपानायेत्यपऽआ
नाय। व्यानायेति विऽआनाय। उदानायेत्युत्ऽआनाय। प्रतिष्ठायै। प्रतिस्था

याइति प्रतिऽस्थायै। चरित्राय। अग्निः। त्वा। अभि। पातु। मह्या। स्वस्त्या। छर्दि
षा। शंतमेनेति शम्ऽतमेन। तया। देवतया। अङ्गिरस्वत्। ध्रुवा। सीद॥२८॥ काण्डा
त्काण्डादिति काण्डात्ऽकाण्डात्। प्ररोहन्तीति प्रऽरोहन्ती। परुषःपरुष इति परुषःऽ
परुषः। परि। एव। नः। दूर्वे। प्र। तनु। सहस्रेण। शतेन। च॥२९॥ या। शतेन। प्र
तनोषीति प्रऽतनोषि। सहस्रेण। विरोहसीति विऽरोहसि। तस्याः। ते। देवि। इ
ष्टके। विधेम। हविषा। वयं॥३०॥ याः। ते। अग्ने। सूर्ये। रुचः। दिवं। आतन्वन्तीत्याऽ
तन्वन्ति। रश्मिभिरिति रश्मिऽभिः। ताभिः। नः। अद्य। सर्वाभिः। रुचे। जनाय।
नः। कृधि॥३१॥ याः। वः। देवाः। सूर्ये। रुचः। गोषु। अश्वेषु। याः। रुचः। इन्द्राग्नी
इतीन्द्राग्नी। ताभिः। सर्वाभिः। रुचं। नः। धत्त। बृहस्पते॥३२॥ विराडिति विऽराट्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्योतिः । अधारयत् । स्वराळिति स्वःऽराट् । ज्योतिः । अधारयत् । प्रजापतिरिति
प्रजाऽपतिः । त्वा । सादयतु । पृष्ठे । पृथिव्याः । ज्योतिष्मतीं ॥ २३ ॥ विश्वस्मै । प्राणा
य । अपानायेत्यपऽआनाय । व्यानायेति विऽआनाय । विश्वं । ज्योतिः । यच्छ । अ
ग्निः । ते । अधिपतिरित्यधिऽपतिः । तया । देवतया । अंगिरस्वत् । ध्रुवा । सीद ॥ २४
मधुः । च । माधवः । च । वासंतिकौ । ऋतू इत्यृतू । अग्नेः । अंतःश्लेष इत्यंतःऽश्ले
२१ षः । असि । कल्पेतां । द्यावापृथिवी इति द्यावापृथिवी । कल्पंतां । आपः । ओ २१
षधयः । कल्पंतां । अग्नयः । पृथक् । मम । ज्यैष्ठ्याय । सव्रता इति सऽव्रताः । ये । अ
ग्नयः । समनस इति सऽमनसः । अंतरा । द्यावापृथिवी इति द्यावापृथिवी । इमे
इतीमे । वासंतिकौ । ऋतू इत्यृतू । अभिकल्पमाना इत्यभिऽकल्पमानाः । इंद्रं

वेतीन्द्रं । इव । देवाः । अभिसंविशंत्वित्यभिऽसंविशंतु । तया । देवतया । अंगिरस्व
त् । ध्रुवे इति ध्रुवे । सीदतं ॥ २५ ॥ अषाळ्हा । असि । सहमाना । सहस्व । अरातीः ।
सहस्व । पृतनायत इति पृतनाऽयतः । सहस्रवीर्येति सहस्रऽवीर्या । असि । सा ।
मा । जिन्व ॥ २६ ॥ सहस्व । इमाः । अभिमातीरित्यभिऽमातीः । सहस्व । पृतनायत
इति पृतनाऽयतः । सहस्व । सर्वं । पाप्मानं । सहमाना । असि । ओषधे ॥ २७ ॥ मधु ।
वाताः । ऋतायत इत्यृतऽयते । मधु । क्षरंति । सिंधवः । माध्वीः । नः । संतु ।
ओषधीः ॥ २८ ॥ मधु । नक्तं । उत । उषसः । मधुमदिति मधुऽमत् । पार्थिवं । रजः । मधु ।
द्यौः । अस्तु । नः । पिता ॥ २९ ॥ मधुमानिति मधुऽमान् । नः । वनस्पतिः । मधुमा
निति मधुऽमान् । अस्तु । सूर्यः । माध्वीः । गावः । भवंतु । नः ॥ ३० ॥ अपां । गंभन्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सीद । मा । त्वा । सूर्यः । अभि । ताप्सीत् । मा । अग्निः । वैश्वानरः । अछिन्नपत्राऽइत्य
छिन्नऽपत्राः । प्रजाऽइति प्रऽजाः । अनुवीक्षस्वेत्यनुऽवीक्षस्व । अनु । त्वा । दिव्या । वृ
ष्टिः । सचतां ॥३१॥ त्रीन् । समुद्रान् । सं । असृपत् । स्वर्गानिति स्वःऽगान् । अपां ।
पतिः । वृषभः । इष्टकानां । पुरीषं । वसानः । सुकृतस्येति सुऽकृतस्य । लोके । तत्र ।
२१ गच्छ । यत्र । पूर्वे । परेताऽइति पराऽइताः ॥३२॥ ध्रुवा । असि । धरुणा । इतः । जज्ञे । प्र
थमं । एभ्यः । योनिभ्यऽइति योनिऽभ्यः । अधि । जातवेदाऽइति जातऽवेदाः । सः । गा २१
यत्र्या । त्रिष्टुभा । त्रिस्तुभेति त्रिऽस्तुभा । अनुष्टुभा । अनुस्तुभेत्यनुऽस्तुभा । च ।
देवेभ्यः । हव्यं । वहतु । प्रजानन्निति प्रऽजानन् ॥३३॥ इषे । राये । रमस्व । सहसे ।
द्युम्ने । ऊर्ज्जे । अपत्याय । सम्राडिति सम्ऽराट् । असि । स्वराडिति स्वऽराट् । असि ।

सारस्वतौ । त्वा । उत्सौ । प्र । अवतां ॥३४॥ अग्ने । युक्ष्व । हि । ये । तव । अश्वासः । देव ।
साधवः । अरं । वहंति । मन्यवे ॥३५॥ युक्ष्व । हि । देवहूतमानिति देवऽहूतमान् ।
अश्वान् । अग्ने । रथीरिवेति रथीःऽइव । नि । होता । पूर्व्यः । सदः ॥३६॥ सम्यक् ।
स्रवंति । सरितः । न । धेनाः । अंतः । हृदा । मनसा । पूयमानाः । घृतस्य । धाराः ।
अभि । चाकशीमि । हिरण्ययः । वेतसः । मध्ये । अग्नेः ॥३७॥ ऋचे । त्वा । रुचे । त्वा । भा
से । ज्योतिषे । त्वा । अभूत् । इदं । विश्वस्य । भुवनस्य । वाजिनं । अग्नेः । वैश्वानरस्य ।
च ॥३८॥ अग्निः । ज्योतिषा । ज्योतिष्मान् । रुक्मः । वर्चसा । वर्चस्वान् । सहस्र
दाऽइति सहस्रऽदाः । असि । सहस्राय । त्वा ॥३९॥ आदित्यं । गर्भं । पयसा । सं ।
अंग्धि । सहस्रस्य । प्रतिमामिति प्रतिऽमां । विश्वरूपमिति विश्वऽरूपं । परि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३२ ३२

वृद्धिं । हरसा । मा । अभि । मंऽस्थाः । शतायुषमिति शतऽआयुषं । कृणुहि । ची
यमानः ॥४०॥ वातस्य । जूतिं । वरुणस्य । नाभिं । अश्वं । जज्ञानं । सरिरस्य । म
ध्ये । शिशुं । नदीनां । हरिं । अद्रिबुध्नमित्यद्रिऽबुध्नं । अग्ने । मा । हिंसीः । परमे ।
व्योमन्निति विऽओमन् ॥४१॥ अजस्रं । इंदुं । अरुषं । भुरण्युं । अग्निं । ईळे ।
पूर्वचित्तिमिति पूर्वऽचित्तिं । नमोभिरिति नमःऽभिः । सः । पर्वभिरिति पर्वऽ
भिः । ऋतुश इत्यृतुऽशः । कल्पमानः । गां । मा । हिंसीः । अदितिं । विराजमि
ति विऽराजं ॥४२॥ वरूत्रीं । त्वष्टुः । वरुणस्य । नाभिं । अविं । जज्ञानां । रजसः ।
परस्मात् । महीं । साहस्रीं । असुरस्य । मायां । अग्ने । मा । हिंसीः । परमे ।

व्योमन्निति विऽओमन् ॥४३॥ यः । अग्निः । अग्नेः । अधि । अजायत । शोकात् ।
पृथिव्याः । उत । वा । दिवः । परि । येन । प्रजा इति प्रऽजाः । विश्वकर्मेति विश्वऽकर्मा ।
जजान । तं । अग्ने । हेळः । परि । ते । वृणक्तु ॥४४॥ इमं । मा । हिंसीः । द्विपाद
मिति द्विऽपादं । पशुं । सहस्राक्ष इति सहस्रऽअक्षः । मेधाय । चीयमानः । मयुं । पशुं ।
मेधं । अग्ने । जुषस्व । तेन । चिन्वानः । तन्वः । नि । सीद ॥४५॥ मयुं । ते । शुक् । ऋ
च्छतु । यं । द्विष्मः । तं । ते । शुक् । ऋच्छतु ॥४६॥ एकशफमित्येकऽशफं । पशुं । कनिक्र
दं । वाजिनं । वाजिनेषु । गौरं । आरण्यं । अनु । ते । दिशामि ॥४७॥ साहस्रं । शत
धारमिति शतऽधारं । उत्सं । व्यचमानमिति विऽअचमानं । सरिरस्य । मध्ये ।
घृतं । दुहानां । अदितिं । जनाय । मवयं ॥४८॥ ऊर्णायुं । वरुणस्य । नाभिं । त्वचं ।

२४ पशूनां ॥ द्विपदामिति द्विःऽपदां ॥ चतुष्पदां ॥ चतुःपदामिति चतुःऽपदां ॥ वसुः ॥ प्रजा
नामिति प्रऽजानां ॥ प्रथमं जनित्रं ॥ गुह्ये ॥ ४८ ॥ अजा ॥ हि ॥ अग्नेः ॥ अजनिष्ट ॥ शो
कात् ॥ सः ॥ अपश्यत् ॥ जनितारं ॥ अग्रे ॥ तेन ॥ देवाः ॥ देवतां ॥ अग्रं ॥ आयन् ॥ ते
न ॥ रोहं ॥ आयन् ॥ उप ॥ मेध्यासः ॥ आरभं ॥ ४९ ॥ त्वं ॥ यविष्ठ ॥ दाशुषः ॥ नॄन् ॥ पाहि
शृणुधि ॥ गिरः ॥ रक्ष ॥ तोकं ॥ उत ॥ त्मना ॥ ५० ॥ अपां ॥ त्वा ॥ एमन् ॥ सादयामि ॥ ओ
द्मन् ॥ भस्मन् ॥ ज्योतिषि ॥ अयने ॥ अर्णवे ॥ समुद्रे ॥ सरिरे ॥ क्षये ॥ सधिषि ॥ सद
ने ॥ सधस्थ इति सधऽस्थे ॥ योनौ ॥ पुरीषे ॥ पाथसि ॥ गायत्रेण ॥ त्रैष्टुभेन ॥ त्रैस्तु
भेनेति त्रैस्तुभेन ॥ जागतेन ॥ आनुष्टुभेन ॥ आनुस्तुभेनेत्यानुऽस्तुभेन ॥ पां
क्तेन ॥ त्वा ॥ छंदसा ॥ सादयामि ॥ ५१ ॥ अयं ॥ पुरः ॥ भुवः ॥ तस्य ॥ प्राणः ॥ भौवायनः ॥ २४

इति भौवऽआयनः ॥ वसंतः ॥ प्राणायन इति प्राणऽआयनः ॥ गायत्री ॥ वासंती ॥ ५२ ॥
गायत्र्यै ॥ गायत्रं ॥ गायत्रात् ॥ उपांशुरित्युपऽअंशुः ॥ उपांशोरित्युपऽअंशोः ॥
त्रिवृदिति त्रिऽवृत् ॥ त्रिवृत इति त्रिऽवृतः ॥ रथंतरमिति रथंऽतरं ॥ वसिष्ठः ॥ ऋषिः ॥
प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया ॥ त्वया ॥ प्राणं ॥ गृह्णामि ॥ प्रजाभ्य इति
प्रऽजाभ्यः ॥ ५३ ॥ अयं ॥ दक्षिणा ॥ विश्वकर्मेति विश्वऽकर्मा ॥ तस्य ॥ मनः ॥ वैश्वकर्म
णमिति वैश्वऽकर्मणं ॥ ग्रीष्मः ॥ मानसः ॥ त्रिष्टुप् ॥ त्रिस्तुबिति त्रिऽस्तुप् ॥ ग्रैष्मी ॥ त्रि
ष्टुभः ॥ त्रिस्तुभ इति त्रिऽस्तुभः ॥ स्वारं ॥ स्वारात् ॥ अंतर्यामः ॥ अंतर्याम इत्यंतःऽयामः ॥ अंतर्या
मादित्यंतःऽयामात् ॥ पंचदशः ॥ पंचदश इति पंचऽदशः ॥ पंचदशादिति पंचऽदशात् ॥ बृहत् ॥
भरद्वाज इति भरत्ऽवाजः ॥ ऋषिः ॥ प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वया । मनः । गृह्णामि । प्रजाभ्य इति प्रऽजाभ्यः ॥ ५४ ॥ अयं । पश्चात् । विश्वव्यचः ।
इति विश्वऽव्यचाः । तस्य । चक्षुः । वैश्वव्यचसमिति वैश्वऽव्यचसं । वर्षाः । चाक्षुष्यः ।
२८ जगती । वार्षी ॥ ५५ ॥ जगत्याः । ऋक्सममिति ऋक्ऽसमं । ऋक्समादित्यृक्ऽसमा
त् । शुक्रः । शुक्रात् । सप्तदश इति सप्तऽदशः । सप्तदशादिति सप्तऽदशात् । वैरूपं । ज
२५ मदग्निरिति जमत्ऽअग्निः । ऋषिः । प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया ।
त्वया । चक्षुः । गृह्णामि । प्रजाभ्य इति प्रऽजाभ्यः ॥ ५६ ॥ इदं । उत्तरात् । स्वरिति स्वः । २५
तस्य । श्रोत्रं । सौवं । शरत् । श्रौत्री । अनुष्टुप् । अनुस्तुबित्यनुऽस्तुप् । शारदी ॥ ५७
अनुष्टुभः । अनुस्तुभ इत्यनुऽस्तुभः । ऐडं । ऐडात् । मंथी । मंथिनः । एकविंश इ
त्येकऽविंशः । एकविंशादित्येकऽविंशात् । वैराजं । विश्वामित्रः । ऋषिः ।

प्रजापतिगृहीतयेति प्रजापतिऽगृहीतया । त्वया । श्रोत्रं । गृह्णामि । प्रजाभ्य इति प्र
ऽजाभ्यः ॥ ५८ ॥ इयं । उपरि । मतिः । तस्यै । वाक् । मात्या । हेमंतः । वाच्यः । पंक्तिः । हैमंती ।
॥ ५९ ॥ पंक्त्यै । निधनवदिति निधनऽवत् । निधनवत इति निधनऽवतः । आग्रयणः ।
आग्रयणात् । त्रिणवत्रयस्त्रिंशौ । त्रिनवत्रयस्त्रिंशावितित्रिनवत्रयस्त्रिं
शौ । त्रिणवत्रयस्त्रिंशाभ्यां । त्रिनवत्रयस्त्रिंशाभ्यामिति त्रिनवत्रयस्त्रिं
शाभ्यां । शाक्वररैवते इति शाक्वररैवते । विश्वकर्मेति विश्वऽकर्मा । ऋषिः । प्र
जापतिगृहीतयेति प्रजापतिऽगृहीतया । त्वया । वाचं । गृह्णामि । प्रजाभ्य इति
प्रऽजाभ्यः । लोकं । पृण । ताः । अस्य । इंद्रं । विश्वाः ॥ ६० ॥ ६१ ॥ इति चतुर्दशोध्यायः ॥
हरिः ॐ ॥ ध्रुवक्षितिरिति ध्रुवऽक्षितिः । ध्रुवयोनिरिति ध्रुवऽयोनिः । ध्रुवा ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

असि । ध्रुवं । योनिं । आ । सीद । साधुयेति साधुऽया । उख्यस्य । केतुं । प्रथमं । जुषाणा ॥
अश्विना । अध्वर्यू इत्यध्वर्यू । सादयतां । इह । त्वा ॥ १ ॥ कुलायिनी । घृतवतीति घृत
ऽवती । पुरंधिरिति पुरंऽधिः । स्योने । सीद । सदने । पृथिव्याः । अभि । त्वा । रुद्राः ।
वसवः । गृणंतु । इमा । ब्रह्म । पीपिहि । सौभगाय ॥ २ ॥ स्वैः । दक्षैः । दक्षपितेति दक्ष
१९ ऽपिता । इह । सीद । देवानां । सुम्ने । बृहते । रणाय । पितेवेति पिताऽइव । एधि ।
सूनवे । आ । सुशेवेति सुऽशेवा । स्वावेशेति सुऽआवेशा । तन्वा । सं । विशस्व ॥ ३ ॥ १६
पृथिव्याः । पुरीषं । असि । अप्सः । नाम । तां । त्वा । विश्वे । अभि । गृणंतु । देवाः ॥
स्तोमपृष्ठेति स्तोमऽपृष्ठा । घृतवतीति घृतऽवती । इह । सीद । प्रजावदिति प्रजाऽ
वत् । अस्मे इत्यस्मे । द्रविणा । आ । यजस्व ॥ ४ ॥ अदित्याः । त्वा । पृष्ठे । सादयामि ।

अंतरिक्षस्य । धर्त्रीं । विष्टंभनीं । दिशां । अधिपत्नीमित्यधिऽपत्नीं । भुवनानां ।
ऊर्मिः । द्रप्सः । अपां । असि । विश्वकर्मेति विश्वऽकर्मा । ते । ऋषिः ॥ शुक्रः । शुचिः ।
ग्रैष्मौ । ऋतू इत्यृतू ॥ ६ ॥ सजूरिति सऽजूः । ऋतुभिरित्यृतुऽभिः । विधाभिरिति वि
ऽधाभिः । देवैः । देवैः । वयोनाधैरिति वयःऽनाधैः । अग्नये । त्वा । वैश्वानराय । वसुभि
रिति वसुऽभिः । रुद्रैः । आदित्यैः । विश्वैः । देवैः ॥ ७ ॥ प्राणं । मे । पाहि । अपानमित्य
पऽआनं । व्यानमिति विऽआनं । चक्षुः । मे । उर्व्या । वि । भाहि । श्रोत्रं । मे । श्लोकय ।
॥ ८ ॥ अपः । पिन्व । ओषधीः । जिन्व । द्विपादिति द्विऽपात् । अव । चतुष्पात् । चतुः
पादिति चतुःऽपात् । पाहि । दिवः । वृष्टिं । आ । ईरय ॥ ९ ॥ मूर्द्धा । वयः । प्रजापति
रिति प्रजाऽपतिः । छंदः । क्षत्रं । मयंदं । विष्टंभः । अधिपतिरित्यधिऽपतिः । वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऽकर्मेति विश्वऽकर्मा। परमेष्ठी। परमेस्थीति परमेऽस्थी।।९।। बस्तः। विवलमिति
विऽवलं। वृष्णिः। विशालमिति विऽशालं। पुरुषः। तंद्रं। व्याघ्रः। अनाधृष्टं।।१०।।
सिंहः। छदिः। पष्ठवाडिति पष्ठऽवाट्। बृहती। उक्षा। ककुप्। ऋषभः। सतोबृ
हतीति सतःऽबृहती।।११।। अनड्वान्। पंक्तिः। धेनुः। जगती। त्र्यविरिति त्रिऽअ
२७ विः। त्रिष्टुप्। त्रिस्तुबिति त्रिऽस्तुप्। दित्यवाडिति दित्यऽवाट्। विराडिति वि
राट्।।१२।। पंचाविरिति पंचऽअविः। गायत्री। त्रिवत्स इति त्रिऽवत्सः। उष्णिक्। २६
तुर्यवाडिति तुर्यऽवाट्। अनुष्टुप्। अनुस्तुबित्यनुऽस्तुप्। छंदः।।१३।। इंद्रा
ग्नी इतींद्राग्नी। अव्यथमानां। इष्टकां। दृंहतं। युवं। पृष्ठेन। द्यावापृथिवी
इति द्यावापृथिवी। अंतरिक्षं। च। वि। बाधसे।।१४।। विश्वकर्मेति विश्वऽकर्मा।

त्वा। सादयतु। अंतरिक्षस्य। अंतरिक्षं। वायुः।।१५।। राज्ञी। असि। प्राची। दिक्।
विराडिति विऽराट्। दक्षिणा। सम्राडिति संऽराट्। प्रतीची। स्वराडिति स्वऽराट्।
उदीची। अधिपत्नीत्यधिऽपत्नी। असि। बृहती। दिक्। नभः। नभस्यः। वार्षिकौ।
इषः। ऊर्ज्जः। शारदौ। ऋतू इत्यृतू।।१६।। आयुः। मे। पाहि। प्राणं। अपानमित्यप
ऽआनं। व्यानमिति विऽआनं। चक्षुः। श्रोत्रं। वाचं। पिन्व। मनः। जिन्व। आत्मानं। पा
हि। ज्योतिः। मे। यच्छ।।१७।। मा। छंदः। प्रमेति प्रऽमा। प्रतिमेति प्रतिऽमा। अस्त्रीव
यः। पंक्तिः। उष्णिक्।।१८।। बृहती। अनुष्टुप्। अनुस्तुबित्यनुऽस्तुप्। विराडिति वि
राट्। गायत्री। त्रिष्टुप्। त्रिस्तुबिति त्रिऽस्तुप्। जगती।।१९।। पृथिवी। अंतरिक्षं।
द्यौः। समाः। नक्षत्राणि। वाक्।।२०।। मनः। कृषिः। हिरण्यं। गौः। अजा। अश्वः। छंदः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२१॥ अग्निः। देवता। वातः। सूर्यः। चंद्रमाः। वसवः। रुद्राः। आदित्याः। मरुतः। विश्वे।
देवाः। बृहस्पतिः। इंद्रः। वरुणः। देवता॥२२॥ मूर्द्धा। असि। राट्। ध्रुवा। धरुणा।
धर्त्री। धरणी। आयुषे। वर्चसे। कृष्यै। क्षेमाय॥२३॥ यंत्री। राट्। यंत्री। यमनी। ध्रु
वा। धैर्त्री। धरित्री। इषे। ऊर्ज्जे। रय्यै। पोषाय। त्वा॥२४॥ आशुः। त्रिवृदिति त्रि
२१ ऽवृत्। भांतः। पंचदश इति पंचऽदशः। व्योमेति विऽओम। सप्तदश इति सप्तऽदशः।
धरुणः। एकविंश इत्येकऽविंशः। प्रतूर्तिरिति प्रऽतूर्तिः। अष्टादश इत्यष्टा २१
ऽदशः। तपः। नवदश इति नवऽदशः। अभीवर्त्तः। अभिवर्त्त इत्यभिऽवर्त्तः। सविं
श इति सऽविंशः। वर्च्चः। द्वाविंशः। संभरण इति संऽभरणः। त्रयोविंश इति
त्रयःऽविंशः। योनिः। चतुर्विंश इति चतुःऽविंशः॥२५॥ गर्भाः। पंचविं

श इति पंचऽविंशः। ओजः। त्रिणवः। त्रिणव इति त्रिऽनवः। क्रतुः। एकत्रिं
श इत्येकऽत्रिंशः। प्रतिष्ठा। प्रतिष्ठेति प्रतिऽस्था। त्रयस्त्रिंश इति त्रयःऽत्रि
ंशः। ब्रध्नस्य। विष्टपं। चतुस्त्रिंश इति चतुःऽत्रिंशः। नाकः। षट्त्रिंश इ
ति षट्ऽत्रिंशः। विवर्त्त इति विऽवर्त्तः। अष्टाचत्वारिंश इत्यष्टाऽचत्वारिंशः।
धर्त्रं। चतुष्टोमः। चतुस्तोम इति चतुःऽस्तोमः॥२६॥ अग्नेः। भागः। असि। दी
क्षायाः। आधिपत्यमित्याधिऽपत्यं। ब्रह्म। स्पृतं। त्रिवृदिति त्रिऽवृत्। स्तोमः।
इंद्रस्य। भागः। असि। विष्णोः। आधिपत्यमित्याधिऽपत्यं। क्षत्रं। स्पृतं। पंच
दश इति पंचऽदशः। स्तोमः॥२७॥ नृचक्षसामिति नृऽचक्षसां। भागः। असि।
धातुः। आधिपत्यमित्याधिऽपत्यं। जनित्रं। स्पृतं। सप्तदश इति सप्तऽदशः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तोमः। मित्रस्य। भागः। असि। वरुणस्य। आधिपत्यमित्याधिऽपत्यं। दिवः।
वृष्टिः। वातः। स्पृतः। एकविंशइत्येकऽविंशः। स्तोमः॥२४॥ वसूनां। भागः।
असि। रुद्राणां। आधिपत्यमित्याधिऽपत्यं। चतुष्पात्। चतुःपादितिचतुःऽ
पात्। स्पृतं। चतुर्विंशइतिचतुःऽविंशः। स्तोमः। आदित्यानां। भागः।
२१ असि। मरुतां। आधिपत्यमित्याधिऽपत्यं। गर्भाः। स्पृताः। पंचविंश
इतिपंचऽविंशः। स्तोमः॥२५॥ अदितेः। भागः। असि। पूष्णः। आधि २६
पत्यमित्याधिऽपत्यं। ओजः। स्पृतं। त्रिणवः। त्रिनवइतित्रिऽनवः। स्तोमः।
देवस्य। सवितुः। भागः। असि। बृहस्पतेः। आधिपत्यमित्याधिऽपत्यं। स
मीचीः। दिशः। स्पृताः। चतुष्टोमः। चतुस्तोमइतिचतुःऽस्तोमः। स्तोमः।२६

यवानां। भागः। असि। अयवानां। आधिपत्यमित्याधिऽपत्यं। प्रजाइतिप्रऽ
जाः। स्पृताः। चतुश्चत्वारिंशइतिचतुःऽचत्वारिंशः। स्तोमः। ऋभूणां। भा
गः। असि। विश्वेषां। देवानां। आधिपत्यमित्याधिऽपत्यं। भूतं। स्पृतं। त्रय
स्त्रिंशइतित्रयःऽत्रिंशः। स्तोमः। सहः। सहस्यः। हैमंतिकौ। ऋतूइत्यृ
तू॥२७॥ एकया। अस्तुवत। प्रजाइतिप्रऽजाः। अधीयंत। प्रजापतिरिति
प्रजाऽपतिः। अधिपतिरित्यधिऽपतिः। आसीत्। तिसृभिरितितिसृऽभिः।
अस्तुवत। ब्रह्म। असृज्यत। ब्रह्मणः। पतिः। अधिपतिरित्यधिऽपतिः।
आसीत्। पंचभिरितिपंचऽभिः। अस्तुवत। भूतानि। असृज्यंत। भूता
नां। पतिः। अधिपतिरित्यधिऽपतिः। आसीत्। सप्तभिरितिसप्तऽभिः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४० अस्तुवत। सप्तऋषय इति सप्तःऋषयः। असृज्यंत। धाता। अधिपतिरित्य ४०
धिःपतिः। आसीत्॥३॥ नवभिरिति नवःभिः। अस्तुवत। पितरः। अ
सृज्यंत। अदितिः। अधिपत्नीत्यधिःपत्नी। आसीत्। एकादशभिरित्ये
कादशःभिः। अस्तुवत। ऋतवः। असृज्यंत। आर्तवाः। अधिपतय इ
त्यधिःपतयः। आसन्। त्रयोदशभिरिति त्रयोदशःभिः। अस्तुवत। मा
साः। असृज्यंत। संवत्सरः। अधिपतिरित्यधिःपतिः। आसीत्। पंचदश
भिरिति पंचदशःभिः। अस्तुवत। क्षत्रं। असृज्यत। इंद्रः। अधिपतिरित्य
धिःपतिः। आसीत्॥४॥ सप्तदशभिरिति सप्तदशःभिः। अस्तुवत। ग्रा
म्याः। पशवः। असृज्यंत। बृहस्पतिः। अधिपतिरित्यधिःपतिः। आसीत्।

नवदशभिरिति नवदशःभिः। अस्तुवत। शूद्रार्यौ। असृज्येतां। अहोरात्रे इत्यहो
रात्रे। अधिपत्नी इत्यधिःपत्नी। आस्तां। एकविंशत्येत्येकःविंशत्या। अस्तु
वत। एकशफा इत्येकःशफाः। पशवः। असृज्यंत। वरुणः। अधिपतिरित्यधिः
पतिः। आसीत्। त्रयोविंशत्येति त्रयःविंशत्या। अस्तुवत। क्षुद्राः। पशवः।
असृज्यंत। पूषा। अधिपतिरित्यधिःपतिः। आसीत्॥५॥ पंचविंशत्येति पं
चविंशत्या। अस्तुवत। द्यावापृथिवी इति द्यावापृथिवी। वि। ऐतां। वसवः।
रुद्राः। आदित्याः। अनुव्यायन्नित्यनुःविआयन्। ते। एव। अधिपतय इत्यधिःप
तयः। आसन्। नवविंशत्येति नवःविंशत्या। अस्तुवत। वनस्पतयः। असृ
ज्यंत। सोमः। अधिपतिरित्यधिःपतिः। आसीत्। एकत्रिंशतेत्येकःत्रिंशता।

सप्तविंशत्येति सप्तःविंशत्या।
अस्तुवत।

अस्तुवत। प्रजाः। असृज्यंत। यवाः। च। अयवाः। च। अधि
पतय इत्यधिःपतयः। आसन्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४१

अस्तृतवत। प्रजाइतिप्रऽजाः। असृज्यंत। यवाः। च। अयवाः। च। अधिपतीइत्यधिऽपत्
नीयः। आसन्। त्रयस्त्रिंशतेतित्रयःऽत्रिंशता। अस्तृतवत। भूतानि। अश्रा
म्यन्। प्रजापतिरितिप्रजाऽपतिः। परमेष्ठी। परमेष्ठीतिपरमेऽस्थी। अधिपति
रित्यधिऽपतिः। आसीत्॥२५॥७॥ इतिपदपाठेपंचदशोध्यायः॥७॥ हरिः ॐ॥
अग्ने। जातान्। प्र। नुद। नः। सपत्नानितिसऽपत्नान्। प्रति। अजातान्। जातवेद इ
तिजातऽवेदः। नुदस्व। अधि। नः। ब्रूहि। सुमना इतिसुऽमनाः। अहेळन्। तव। स्याम।
शर्मन्। त्रिवरूथइतित्रिऽवरूथे। उद्भाइत्युत्ऽभौ॥१॥ सहसा। जातान्। प्र। नुद। नः।
सपत्नानितिसऽपत्नान्। प्रति। अजातान्। नुद। जातवेद इतिजातऽवेदः। अधि। नः।
ब्रूहि। सुमनस्यमान इतिसुऽमनस्यमानः। वयं। स्याम। प्र। नुद। नः। सपत्नानितिस

पत्नान्। षोळशी। स्तोमः। ओजः। द्रविणं। चतुश्चत्वारिंशइतिचतुःऽचत्वारिंशः।
स्तोमः। वर्चः। द्रविणं॥२॥ अग्नेः। पुरीषं। असि। अप्सः। नाम। तां। त्वा। विश्वे। अभि। गृ
णंतु। देवाः। स्तोमपृष्ठेतिस्तोमऽपृष्ठा। घृतवतीतिघृतऽवती। इह। सीद। प्रजावदि
तिप्रजाऽवत्। अस्मे इत्यस्मे। द्रविणा। आ। यजस्व॥३॥ एवः। छंदः। वरिवः। छंदः। शंभूः
रितिशंऽभूः। परिभूरितिपरिऽभूः। आच्छदित्याऽछत्। मनः। व्यचः॥४॥ सिंधुः। समु
द्रः। सरिरं। ककुप्। त्रिककुबितित्रिऽककुप्। काव्यं। अंकुपं॥५॥ अक्षरपंक्तिरित्यक्ष
रऽपंक्तिः। पदपंक्तिरितिपदऽपंक्तिः। विष्टारपंक्तिः। विस्तारपंक्तिरितिविस्तारऽपंक्तिः।
क्षुरः। भ्रजः। आच्छदित्याऽछत्। प्रच्छदितिप्रऽछत्। संयदितिसंऽयत्। वियदितिवि
यत्॥६॥ बृहत्। रथंतरमितिरथंऽतरं। निकायइतिनिऽकायः। विवध इतिविऽवधः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४२ गिरः। अजः॥ सपरस्कृविति सं॥स्कृपूः। अनुष्टुप्। अनुस्कृविस्त्यनु॥स्कृपा॥७॥ एवः।
वरिवः। वयः। वयस्कृत्। वयःकृदिति वयः॥कृत्। विस्पर्धाः। विस्पर्धा इति वि॥स्पर्धाः।
विभ्राष्टुमिति विभ्राष्टुं। स्तुदः। दूरोहणमिति दुः॥रोहणं। तंद्रं। अर्कांकमित्यर्कः॥
अर्कं। अष्टौ। छंदः॥८॥ रश्मिना॥ सेत्याय। सत्यं। जिन्व। प्रेतिनेति प्र॥इतिना। धर्म
णा। धर्मं। अन्वित्येत्यनु॥इत्या। दिवा। दिवं। संधिनेति सं॥धिना। अंतरिक्षेण।
अंतरिक्षं॥९॥ प्रतिधिनेति प्रति॥धिना। पृथिव्या। पृथिवीं। विष्टंभेन। वृष्ट्या। ४२
वृष्टिं। प्रवयेति प्र॥वया। अन्हा। अहः। अनुयेत्यनु॥या। रात्र्या। रात्रीं॥१०॥ उशि
जा। वसुभ्य इति वसु॥भ्यः। वसून्। प्रकेतेनेति प्र॥केतेन। आदित्येभ्यः। आदित्यान्।
तंतुना। रायः। पोषेण। रायः। पोषं। संसर्पेणेति सं॥सर्पेण। श्रुताय। श्रुतं॥११॥

ऐडेन। ओषधीभिः। ओषधीः। उत्तमेनेत्युत्॥तमेन। तनूभिः। तनूः। वयोधसेति
वयः॥धसा। आधीतेनेत्या॥धीतेन। आधीतमित्या॥धीतं। अभिजितेत्यभि॥
जिता। तेजसा। तेजः॥ जिन्व॥१२॥ प्रतिपदिति प्रति॥पत्। असि। प्रतिपद इति
प्रति॥पदे। त्वा। अनुपदित्यनु॥पत्। अनुपद इत्यनु॥पदे। संपदिति सं॥पत्।
संपद इति सं॥पदे। तेजः। तेजसे॥१३॥ त्रिवृदिति त्रि॥वृत्। त्रिवृत इति त्रि॥वृ
ते। प्रवृदिति प्र॥वृत्। प्रवृत इति प्र॥वृते। विवृदिति वि॥वृत्। विवृत इति वि॥
वृते। सवृदिति स॥वृत्। सवृत इति स॥वृते॥१४॥ आक्रम इत्या॥क्रमः। आ
क्रमायेत्या॥क्रमाय। संक्रम इति सं॥क्रमः। संक्रमायेति सं॥क्रमाय। उत्क्रम
इत्युत्॥क्रमः। उत्क्रमायेत्युत्॥क्रमाय। उत्क्रांतिरित्युत्॥क्रांतिः। उत्क्रांत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इस्मूत्ऽऋक्सै। त्वा। अधिपतिनेत्यधिऽपतिना। ऊर्ज्जा। ऊर्ज्जं। वेष। ओमितिवेष।
ओः। क्षत्राय। क्षत्रं। जिन्व॥१५॥ राज्ञी। असि। प्राची। दिक्। वसवः। ते। देवाः। अ
धिपतय इत्यधिऽपतयः। अग्निः। हेतीनां। प्रतिधर्त्तेति प्रतिऽधर्त्ता॥१६॥ त्रि
वृदिति त्रिऽवृत्। त्वा। स्तोमः। पृथिव्यां। श्रयतु। आज्यं। उक्थं। अव्यथायै। स्त
४२ भ्नातु। रथंतरमिति रथंऽतरं। साम। प्रतिष्ठित्यै। प्रतिस्थित्या इति प्रतिऽस्थि ४२
त्यै। अंतरिक्षे॥१७॥ ऋषयः। त्वा। प्रथमजा इति प्रथमऽजाः। देवेषु। दिवः।
मात्रया। वरिम्णा। प्रथंतु। विधर्त्तेति विऽधर्त्ता। च। अयं। अधिपतिरित्य
धिऽपतिः। च। ते। त्वा। सर्वे। संविदाना इति संऽविदानाः। नाकस्य। पृष्ठे। स्व
र्ग इति स्वःऽगे। लोके। यजमानं। च। सादयंतु॥१८॥ विराळिति विऽराट्।

असि। दक्षिणा। दिक्। रुद्राः। ते। देवाः। अधिपतय इत्यधिऽपतयः। इंद्रः।
हेतीनां। प्रतिधर्त्तेति प्रतिऽधर्त्ता॥१९॥ पंचदश इति पंचऽदशः। त्वा। स्तोमः।
पृथिव्यां। श्रयतु। प्रउगं। उक्थं। अव्यथायै। स्तभ्नातु। बृहत्। साम। प्रतिष्ठि
त्यै। प्रतिस्थित्या इति प्रतिऽस्थित्यै। अंतरिक्षे॥२०॥ सम्राळिति संऽराट्।
असि। प्रतीची। दिक्। आदित्याः। ते। देवाः। अधिपतय इत्यधिऽपतयः।
वरुणः। हेतीनां। प्रतिधर्त्तेति प्रतिऽधर्त्ता॥२१॥ सप्तदश इति सप्तऽदशः।
त्वा। स्तोमः। पृथिव्यां। श्रयतु। मरुत्वतीयं। उक्थं। अव्यथायै। स्तभ्नातु। वैरू
पं। साम। प्रतिष्ठित्यै। प्रतिस्थित्या इति प्रतिऽस्थित्यै। अंतरिक्षे॥२२॥
स्वराळिति स्वऽराट्। असि। उदीची। दिक्। मरुतः। ते। देवाः। अधिपतय इ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अधिऽपतयः। सोमः। हेतीनां। प्रतिधर्तेति प्रतिऽधर्ता॥२३॥ एकविꣳशः इत्ये
कऽविꣳशः। स्तोमः। पृथिव्यां। श्रयतु। निष्केवल्यं। निःकेवल्यमिति निःऽ
केवल्यं। उक्थं। अव्यथायै। स्तभ्नातु। वैराजं। साम। प्रतिष्ठित्यै। प्रतिस्थित्या
इति प्रतिऽस्थित्यै। अन्तरिक्षे॥२४॥ अधिपत्नीत्यधिऽपत्नी। असि। बृह
ते ती। दिक्। विश्वे। त्वा। देवाः। अधिपतय इत्यधिऽपतयः। बृहस्पतिः। हेतीनां।
४४ प्रतिधर्तेति प्रतिऽधर्ता॥२५॥ त्रिणवत्रयस्त्रिꣳशौ। त्रिणवत्रयस्त्रिꣳ ४४
शाविति त्रिणवऽत्रयस्त्रिꣳशौ। त्वा। स्तोमौ। पृथिव्यां। श्रयतां। वैश्वदेवाग्नि
मारुते इति वैश्वदेवाग्निमारुते। उक्थे इत्युक्थे। अव्यथायै। स्तभ्नीतां। शा
क्वररैवते इति शाक्वररैवते। सामनी इति सामनी। प्रतिष्ठित्यै। प्रतिस्थि

त्याइति प्रतिऽस्थित्यै। अन्तरिक्षे॥२६॥ अयं। पुरः। हरिकेश इति हरिऽकेशः। सू
र्यरश्मिरिति सूर्यऽरश्मिः। तस्य। रथगृत्स इति रथऽगृत्सः। च। रथौजा इति रथऽ
ओजाः। च। सेनानीग्रामण्यौ। सेनानीग्रामण्याविति सेनानीग्रामण्यौ। पुञ्जि
कस्थलेति पुञ्जिकऽस्थला। च। क्रतुस्थलेति क्रतुऽस्थला। च। अप्सरसौ।
दङ्क्ष्णवः। पशवः। हेतिः। पौरुषेयः। वधः। प्रहेतिरिति प्रऽहेतिः॥२७॥ तेभ्यः।
नमः। अस्तु। ते। नः। मृडयन्तु। ते। नः। अवन्तु। ते। यं। द्विष्मः। यः। च। नः। द्वेष्टि। तं।
एषां। जम्भे। दध्मः॥२८॥ अयं। दक्षिणा। विश्वकर्मेति विश्वऽकर्मा। तस्य।
रथस्वन इति रथऽस्वनः। रथेचित्र इति रथेऽचित्रः। मेनका। सहजन्येति सह
जन्या। अप्सरसौ। यातुधाना इति यातुऽधानाः। हेतिः। रक्षाꣳसि। प्रहेतिरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिप्रऽहेतिः ॥ १९ ॥ अयं पश्चात् । विश्वव्यचा इति विश्वऽव्यचाः । तस्य रथप्रो
तऽइति रथऽप्रोतः । असमरथ इत्यसमऽरथः । प्रम्लोचन्ती प्रऽम्लोचन्ती । अ
नुम्लोचन्तीत्यनुऽम्लोचन्ती । अप्सरसौ । व्याघ्राः । हेतिः । सर्पाः । प्रहेतिरिति
प्रऽहेतिः ॥ २० ॥ अयं । उत्तरात् । संयद्वसुरिति संयत्ऽवसुः । तस्य । तार्क्ष्यः ।
४५ अरिष्टनेमिरित्यरिष्टऽनेमिः । विश्वाची । घृताची । अप्सरसौ । आपः । हेतिः ।
वातः । प्रहेतिरिति प्रऽहेतिः ॥ २१ ॥ अयं । उपरि । अर्वाग्वसुरित्यर्वाक्ऽवसुः । ४५
तस्य । सेनजिदिति सेनऽजित् । सुषेणः । सुषेण इति सुऽसेनः । उर्वशी । पूर्व
चित्तिरिति पूर्वऽचित्तिः । अप्सरसौ । अवस्फूर्जन्नित्यवऽस्फूर्जन् । हेतिः ।
विद्युदिति विऽद्युत् । प्रहेतिरिति प्रऽहेतिः ॥ २२ ॥ अयं । अग्निः । सहस्रिणः ।

वाजस्य । शतिनः । पतिः । मूर्धा । कविः । रयीणां ॥ २३ ॥ अबोधि । अग्निः ।
समिधेति सम्ऽइधा । जनानां । प्रति । धेनुमिवेति धेनुम्ऽइव । आयतीमित्याऽयतीं ।
उषासं । उषसमित्युषसं । यह्वाऽइवेति यह्वाःऽइव । प्र । वयां । उज्जिहाना इत्युत्ऽ
जिहानाः । प्र । भानवः । सिस्रते । नाकं । अच्छ ॥ २४ ॥ अवोचाम । कवये । मेध्या
य । वचः । वन्दारु । वृषभाय । वृष्णे । गविष्ठिरः । नमसा । स्तोमं । अग्नौ । दिवीवे
ति दिविऽइव । रुक्मं । उरुव्यञ्चमित्युरुऽव्यञ्चं । अश्रेत् ॥ २५ ॥ जनस्य । गोपाः । अ
जनिष्ट । जागृविः । अग्निः । सुदक्ष इति सुऽदक्षः । सुविताय । नव्यसे । घृतप्रती
क इति घृतऽप्रतीकः । बृहता । दिविस्पृशेति दिविऽस्पृशा । द्युमदिति द्युऽमत् ।
वि । भाति । भरतेभ्यः । शुचिः ॥ २६ ॥ त्वां । अग्ने । अङ्गिरसः । गुहा । हितं । अनु ।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविंदन् । शिश्रियाणं । वनेवन इति वनेऽवने । सः । जायसे । मथ्यमानः । सहः । महत् ।
त्वां । आहुः । सहसः । पुत्रं । अंगिरः ॥३७॥ सखायः । सं । वः । सम्यंचं । इषं । स्तोमं । च ।
अग्नये । वर्षिष्ठाय । क्षितीनां । ऊर्जः । नप्त्रे । सहस्वते ॥३८॥ संऽसमिति संऽसं ।
इत् । युवसे । वृषन् । अग्ने । विश्वानि । अर्यः । आ । इळः । पदे । सं । इध्यसे । सः । नः ।
वसूनि । आ । भर ॥३९॥ त्वां । अग्ने । हविष्मंतः । देवं । मर्तासः । ईळते । मन्ये । त्वा ।
४६ जातवेदसमिति जातऽवेदसं । सः । हव्या । वक्षि । आनुषक् ॥४०॥ त्वां । चित्रश्र ४६
वस्तमेति चित्रश्रवःऽतम । हवंते । विक्षु । जंतवः । शोचिष्केशं । शोचिःऽकेशमिति
शोचिःऽकेशं । पुरुप्रियेति पुरुऽप्रिय । अग्ने । हव्याय । वोळ्हवे ॥४१॥ एना । वः ।
अग्निं । नमसा । ऊर्जः । नपातं । आ । हुवे । प्रियं । चेतिष्ठं । अरतिं । स्वध्वरमिति

सुऽअध्वरं । विश्वस्य । दूतं । अमृतं । सः । योजते । अरुषा । विश्वभोजसेति विश्वऽभो
जसा । सः । दुद्रवत् । स्वाहुत इति सुऽआहुतः ॥४२॥ सः । दुद्रवत् । स्वाहुत इति सुऽआ
हुतः । सुब्रह्मेति सुऽब्रह्मा । यज्ञः । सुशमीति सुऽशमी । वसूनां । देवं । राधः । जनानां ॥
॥४३॥ अग्ने । वाजस्य । गोमत इति गोऽमतः । ईशानः । सहसः । यहो इति यहो । अ
स्मे इत्यस्मे । धेहि । जातवेद इति जातऽवेदः । महि । श्रवः ॥४४॥ सः । इधानः । वसुः ।
कविः । अग्निः । ईळेन्यः । गिरा । रेवत् । अस्मभ्यं । पुर्वणीक । पुर्वनीकेति पुरुऽअनी
क । दीदिहि ॥४५॥ क्षपः । राजन् । उत । त्मना । अग्ने । वस्तोः । उत । उषसः । सः । तिग्म
जंभेति तिग्मऽजंभ । रक्षसः । दह । प्रति ॥४६॥ भद्रः । नः । अग्निः । आहुत इत्याऽहुतः ।
भद्रा । रातिः । सुभगेति सुऽभग । भद्रः । अध्वरः । भद्राः । उत । प्रशस्तय इति प्रऽशस्तयः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४७॥भद्राः।उत।प्रशस्तयइतिप्रशस्तयः।भद्रं।मनः।कृणुष्व।वृत्रतूर्यइतिवृत्र॰
तूर्ये।येन।समत्स्वितिसमत्ऽसु।सासहः।ससहइतिससहः॥४८॥येन।समत्स्वि
तिसमत्ऽसु।सासहः।ससहइतिससहः।अव।स्थिरा।तनुहि।भूरि।शर्धतां।
वनेम।ते।अभिष्टिभिरित्यभिष्टिऽभिः॥४९॥अग्निं।तं।मन्ये।यः।वसुः।अ
स्तं।यं।यंतिधेनवः।अस्तं।अर्वंतः।आशवः।अस्तं।नित्यासः।वाजिनः।इषं।
स्तोतृभ्यइतिस्तोतृऽभ्यः।आ।भर॥५०॥सः।अग्निः।यः।वसुः।गृणे।सं।यं।
आयंतीत्याऽयंति।धेनवः।सं।अर्वंतः।रघुद्रुवइतिरघुऽद्रुवः।सं।सुजातासइ
तिसुऽजातासः।सूरयः।इषं।स्तोतृभ्यइतिस्तोतृऽभ्यः।आ।भर॥५१॥उभेइत्युभे।
सुश्चंद्र।सुश्चंद्रेतिसुऽचंद्र।सर्पिषः।दर्वीइतिदर्वी।श्रीणीषे।आसनि।उतोइ

त्युतो।नः।उत्।पुपूर्याः।उक्थेषु।शवसः।पते।इषं।स्तोतृभ्यइतिस्तोतृऽभ्यः।आ
भर॥५२॥अग्ने।तं।अद्य।अश्वं।न।स्तोमैः।क्रतुं।न।भद्रं।हृदिस्पृशमितिहृदिऽ
स्पृशं।ऋध्याम।ते।ओहैः॥५३॥अध।हि।अग्ने।क्रतोः।भद्रस्य।दक्षस्य।साधोः।
रथीः।ऋतस्य।बृहतः।बभूथ॥५४॥एभिः।नः।अर्कैः।भव।नः।अर्वाङ्।स्वः।न।
ज्योतिः।अग्ने।विश्वेभिः।सुमनाइतिसुऽमनाः।अनीकैः॥५५॥अग्निं।होतारं।
मन्ये।दास्वंतं।वसुं।सूनुं।सहसः।जातवेदसमितिजातऽवेदसं।विप्रं।न।जात
वेदसमितिजातऽवेदसं।यः।ऊर्ध्वया।स्वध्वरइतिसुऽअध्वरः।देवः।देवाच्या।
कृपा।घृतस्य।विभ्राष्टिमितिविऽभ्राष्टिं।अनु।वष्टि।शोचिषा।आजुह्वान
स्येत्याऽजुह्वानस्य।सर्पिषः॥५६॥येन।ऋषयः।तपसा।सत्रं।आयन्।इंधा

४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना:।अग्निं।स्वः।आभरंतइत्याऽभरंतः।तस्मिन्।अहं।नि।दधे।नाके।अग्निं।
यं।आहुः।मनवः।स्तीर्णबर्हिषमितिस्तीर्णऽबर्हिषं॥५७॥तं।पत्नीभिः।अनु।
गच्छेम।देवाः।पुत्रैः।भ्रातृभिरितिभ्रातृऽभिः।उत।वा।हिरण्यैः।नाकं।गृभ्णा
नाः।सुकृतस्येतिसुऽकृतस्य।लोके।तृतीये।पृष्ठे।अधि।रोचने।दिवः॥५८॥
४६ आ।वाचः।मध्यं।अरुहत्।भुरण्युः।अयं।अग्निः।सत्पतिरितिसत्ऽपतिः। ४६
चेकितानः।पृष्ठे।पृथिव्याः।निहितइतिनिऽहितः।दविद्युतत्।अधस्पदं।अ
धःपदमित्यधःऽपदं।कृणुतां।ये।पृतन्यवः॥५९॥अयं।अग्निः।वीरतमइति
वीरऽतमः।वयोधाइतिवयःऽधाः।सहस्रियः।द्योततां।अप्रयुच्छन्नित्यप्रऽयुच्छ
न्।विभ्राजमानइतिविऽभ्राजमानः।सरिरस्य।मध्ये।उप।प्र।याहि।दिव्यानि।

धाम॥६०॥संप्रच्यवध्वमितिसंऽप्रच्यवध्वं।उप।संप्रयातेतिसंऽप्रयात।अग्ने।प
थः।देवयानानितिदेवऽयानानान्।कृणुध्वं।पुनरितिपुनः।कृण्वाना।पितरा।यु
वाना।अन्वातांसीदित्यनुऽआतांसीत्।त्वयि।तंतुं।एतं॥६१॥उद्।बुध्य
स्व।अग्ने।प्रति।जागृहि।त्वं।इष्टापूर्तेइतीष्टाऽपूर्ते।सं।सृजेथां।अयं।च।अस्मि
न्।सधस्थइतिसधऽस्थे।अधि।उत्तरस्मिन्नित्युत्ऽतरस्मिन्।विश्वे।देवाः।
यजमानः।च।आसीदत॥६२॥येन।वहसि।सहस्रं।येन।अग्ने।सर्ववेदसमिति
सर्वऽवेदसं।तेन।इमं।यज्ञं।नः।नय।स्वः।देवेषु।गंतवे॥६३॥तपः।तपस्यः।शै
शिरौ।परमेष्ठी।परमेष्ठीतिपरमेऽस्थी।दिवः।सूर्यः॥६४॥प्रोथत्।अश्वः।
न।यवसे।अविष्यन्।यदा।महः।संवरणादितिसंऽवरणात्।वि।अस्थात्।आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तु।अस्य।वातः।अनु।वाति।ज्योतिः।अघ।स्याते।अजनं।कण्ठं।असि॥६५॥आ
योः।त्वा।सदने।सादयामि।अवतः।छायायां।समुद्रस्य।हृदये।रश्मि।वतीं।
रश्मिवतीमितिरश्मिऽवतीं।भास्वतीं।आ।या।द्यां।भासि।आ।पृथिवीं।आ।
उरु।अंतरिक्षं।दिवं॥६४॥सहस्रस्य।प्रमेतिप्रऽमा।प्रतिमेतिप्रतिऽमा।उन्मे
४१ त्युत्ऽमा।साहस्रः।असि।सहस्राय।त्वा॥६५॥६५॥इतिपदपाठे पञ्चदशोध्या
यः॥६७॥६७॥६७॥हरिः ॐ॥नमः।ते।रुद्र।मन्यवे।उतो इति।ते।इषवे। ४९
नमः।बाहुभ्यामितिबाहुऽभ्यां।उत।ते।नमः॥१॥या।ते।रुद्र।शिवा।तनूः।अघो
रा।अपापकाशिनीत्यपापऽकाशिनी।तया।नः।तन्वा।शंतमयेतिशंऽतमया।
गिरिशंतेतिगिरिऽशंत।हस्ते।बिभर्षि।अस्तवे।शिवां।गिरित्रेतिगिरिऽत्र।

तां।कुरु।मा।हिंसीः।पुरुषं।जगत्॥२॥शिवेन।वचसा।त्वा।गिरिशेतिगिरिऽ
श।अच्छ।वदामसि।यथा।नः।सर्वं।इत्।जगत्।अयक्ष्मं।सुमना इतिसुऽमनाः॥
असत्॥३॥अधि।अवोचत्।अधिवक्तेत्यधिऽवक्ता।प्रथमः।दैव्यः।भिषक्।
अहीन्।च।सर्वान्।जंभयन्।सर्वाः।च।यातुधान्य इतियातुऽधान्यः।अधराचीः।
परा।सुव॥४॥असौ।यः।ताम्रः।अरुणः।उत।बभ्रुः।सुमंगल इतिसुऽमंगलः।
ये।च।एनं।रुद्राः।अभितः।दिक्षु।श्रिताः।सहस्रश इतिसहस्रऽशः।अव।एषां।
हेडः।ईमहे॥५॥असौ।यः।अवसर्पतीत्यवऽसर्पति।नीलग्रीव इतिनीलऽ
ग्रीवः।विलोहित इतिविऽलोहितः।उत।एनं।गोपाः।अदृश्रन्।अदृश्रन्।
उदहार्य इत्युदऽहार्यः।सः।दृष्टः।मृडयाति।नः॥६॥नमः।अस्तु।नीलग्रीवाय।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिनीलऽग्रीवाय।।सहस्राक्षायेतिसहस्रऽअक्षाय।मीढुषे।अथोइत्यथो।ये।
अस्य।सत्वानः।अहं।तेभ्यः।अकरं।नमः।।८।।प्रमुंच।धन्वनः।त्वं।उभयोः।आ
र्त्न्योः।ज्यां।याः।च।ते।हस्ते।इषवः।परा।ताः।भगवइतिभगऽवः।वप।।९।।विज्यमि
तिविऽज्यं।धनुः।कपर्दिनः।विशल्यइतिविऽशल्यः।बाणवानितिबाणऽवान्।
५० उत।अनेशन्।अस्य।याः।इषवः।आभुः।अस्य।निषंगधिरितिनिषंगऽधिः।।१०
परि।ते।धन्वनः।हेतिः।अस्मान्।वृणक्तु।विश्वतः।अथोइत्यथो।यः।इषुधिरि ५०
तीषुऽधिः।तव।आरे।अस्मत्।नि।धेहि।तं।।११।।या।ते।हेतिः।मीढुष्टम।मी
ढुस्तमेतिमीढुःऽतम।हस्ते।बभूव।ते।धनुः।तया।अस्मान्।विश्वतः।त्वं।
अयक्ष्मया।परि।भुज।।१२।।अवतत्येत्यवऽतत्य।धनुः।त्वं।सहस्राक्षेतिस

हस्रऽअक्ष।शतेषुधइतिशतऽइषुधे।निशीर्येतिनिऽशीर्य।शल्यानां।मुखा।शि
वः।नः।सुमनाइतिसुऽमनाः।भव।।१३।।नमः।ते।आयुधाय।अनातताय।धृ
ष्णवे।उभाभ्यां।उत।ते।नमः।बाहुभ्यामितिबाहुऽभ्यां।तव।धन्वने।।१४।।मा।नः।
महांतं।उत।मा।नः।अर्भकं।मा।नः।उक्षंतं।उत।मा।नः।उक्षितं।मा।नः।वधीः।
पितरं।मा।उत।मातरं।मा।नः।प्रियाः।तन्वः।रुद्र।रीरिषः।रिरिषइतिरीरि
षः।।१५।।तोके।तनये।आयुषु।गोषु।अश्वेषु।रीरिषः।रिरिषइतिरिरिषः।
वीरान्।रुद्र।भामिनः।वधीः।हविष्मंतः।सदं।इत्।त्वा।हवामहे।।१६।।८।।
हिरण्यबाहवइतिहिरण्यऽबाहवे।सेनान्यइतिसेनाऽन्ये।दिशां।च।पतये।
नमः।नमः।वृक्षेभ्यः।हरिकेशेभ्यइतिहरिऽकेशेभ्यः।पशूनां।शष्पिंजराय।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्विषीमते। त्विषिमत इति त्विषिऽमते। पथीनां। हरिकेशायेति हरिऽकेशाय। उ
पवीतिन इत्युपऽवीतिने। पुष्टानां॥१७॥ बभ्लुशाय। आव्याधिन इत्याऽव्या
धिने। अन्नानां। भवस्य। हेत्यै। जगतां। रुद्राय। आततायिन इत्याततऽआ
यिने। क्षेत्राणां। सूताय। अहंत्यै। वनानां॥१८॥ रोहिताय। स्थपतये। वृक्षा
५३ णां। भुवंतये। वारिवस्कृताय। वारिवःकृतायेति वारिवःऽकृताय। ओष ५३
धीनां। मंत्रिणे। वाणिजाय। कक्षाणां। उच्चैर्घोषायेत्युच्चैःऽघोषाय। आ
क्रंदयत इत्याऽक्रंदयते। पत्तीनां॥१९॥ कृत्स्नायतायेति कृत्स्नऽआयताय।
धावते। सत्वनां। सहमानाय। निव्याधिन इति निऽव्याधिने। आव्याधिनीनामि नी
त्याऽव्याधिनीनां। ककुभाय। निषंगिणे। स्तेनानां। निचेरव इति निऽचेरवे।

परिचरायेति परिऽचराय। अरण्यानां॥२०॥ वंचते। परिवंचत इति परिऽवंच
ते। स्तायूनां। निषंगिणे। इषुधिमत इतीषुधिऽमते। तस्कराणां। सृकायिभ्य
इति सृकायिऽभ्यः। जिघांसद्भ्य इति जिघांसत्ऽभ्यः। मुष्णतां। असिमद्भ्य
इत्यसिमत्ऽभ्यः। नक्तं। चरद्भ्य इति चरत्ऽभ्यः। भ्यः। विकृंतानामिति विऽकृं
तानां॥२१॥ उष्णीषिणे। गिरिचरायेति गिरिऽचराय। कुलुंचानां। इषुमद्भ्य
इतीषुमत्ऽभ्यः। धन्वायिभ्य इति धन्वायिऽभ्यः। वः। आतन्वानेभ्य इत्याऽत
न्वानेभ्यः। प्रतिदधानेभ्य इति प्रतिऽदधानेभ्यः। आयच्छद्भ्य इत्याऽयच्छत्ऽ
भ्यः। अस्यद्भ्य इत्यस्यत्ऽभ्यः॥२२॥ विसृजद्भ्य इति विसृजत्ऽभ्यः। विध्य
द्भ्य इति विध्यत्ऽभ्यः। स्वपद्भ्य इति स्वपत्ऽभ्यः। जाग्रद्भ्य इति जाग्रत्ऽभ्यः। माया।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेभ्यः। आसीनेभ्यः। तिष्ठद्भ्य इति तिष्ठत्ऽभ्यः। धावद्भ्य इति धावत्ऽभ्यः।२३।
सभाभ्यः। सभापतिभ्य इति सभापतिऽभ्यः। अश्वेभ्यः। अश्वपतिभ्य इत्यश्वप
तिऽभ्यः। आव्याधिनीभ्य इत्याऽव्याधिनीभ्यः। विविध्यन्तीभ्य इति विऽविध्यन्ती
भ्यः। उगणाभ्यः। तृंहतीभ्यः।२४। गणेभ्यः। गणपतिभ्य इति गणपतिऽभ्यः।
व्रातेभ्यः। व्रातपतिभ्य इति व्रातपतिऽभ्यः। गृत्सेभ्यः। गृत्सपतिभ्य इति गृत्सप
तिऽभ्यः। विरूपेभ्य इति विऽरूपेभ्यः। विश्वरूपेभ्य इति विश्वऽरूपेभ्यः।२५। से
नाभ्यः। सेनानिभ्य इति सेनानिऽभ्यः। रथिभ्य इति रथिऽभ्यः। अरथेभ्यः। क्षत्तृ
भ्य इति क्षत्तृऽभ्यः। संग्रहीतृभ्य इति संग्रहीतृऽभ्यः। महद्भ्य इति महत्ऽभ्यः। अ
र्भकेभ्यः।२६। तक्षभ्य इति तक्षऽभ्यः। रथकारेभ्य इति रथऽकारेभ्यः। कुलालेभ्यः। ॥५२॥

कर्मारेभ्यः। निषादेभ्यः। निसादेभ्य इति निऽसादेभ्यः। पुंजिष्टेभ्यः। श्वनिभ्य इति
श्वनिऽभ्यः। मृगयुभ्य इति मृगयुऽभ्यः।२७। श्वभ्य इति श्वऽभ्यः। श्वपतिभ्य इति
श्वपतिऽभ्यः। भवाय। रुद्राय। शर्वाय। पशुपतय इति पशुऽपतये। नीलग्रीवाये
ति नीलऽग्रीवाय। शितिकंठायेति शितिऽकंठाय।२८। कपर्दिने। व्युप्तकेशा
येति व्युप्तऽकेशाय। सहस्राक्षायेति सहस्रऽअक्षाय। शतधन्वन इति शतऽध
न्वने। गिरिशायेति गिरिऽशयाय। शिपिविष्टायेति शिपिऽविष्टाय। मीढु
ष्टमाय। मीढुस्तमायेति मीढुःऽतमाय। इषुमत इतीषुऽमते।२९। ह्रस्वाय। वा
मनाय। बृहते। वर्षीयसे। वृद्धाय। संवृद्ध इति संऽवृधे। अग्र्याय। प्रथमाय। आ
